प्रवेश सं० १२.८२ विषय: धर्म शास्त्रम् क्रम सं०

नाम आशौचत्ता कुलम "प्रपञ्च सार विवेक स्थम" ग्रन्थकार श्री कृष्णकार: अच्युत शिवात्मज:

पत्र सं० १-१७

श्लोक सं० अक्षर सं० (पंक्तौ) ३५ पंक्ति सं० (पृष्ठे) ८

आकार: १०.×४.५. लिपि: दे.ना. आधार: का.

वि० विवरणम पू. 13924 सं. १८१६ न. शा. १५५८

पी० एस० यू० पा०--९९ एस० सी० ई०--१६५१--५० ०००

Indira Gandhi National Centre for the Arts

ब० श्रीगणेशायनमः अथाहोरात्रकृत्यंचसंक्षेपेण शुभप्रदं॥वर्णाश्रमाणांवक्ष्यामिकलिवर्ज्यांश्चतत्वतः
१ ॥१॥ब्राह्मणाःक्षत्रियावैश्याः॥शूद्रोवर्णाःस्मृतास्त्रयः॥ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिराश्रमाः॥२॥ब्रा
ह्मेमुहूर्त्तेचोत्थायस्मृत्वानारायणंहृदि॥स्वस्थःशुचिर्मुनिर्भूत्वाचिंतयेदात्मनोहितं॥२॥मातापितृस
हस्राणिपुत्रदारशतानिच॥संसारेष्वनुभूतानियांतियास्यंतिचापरे॥३॥हर्षस्थानसहस्राणिभयस्थानश
तानिच॥दिवसेदिवसेमूढमाविशंतिनपंडितं॥४॥ऊर्ध्वबाहुर्विरौम्येषनचकश्चिच्छृणोतिमे॥धर्मादर्थ
श्चकामश्चसकिमर्थंनसेव्यते॥५॥नजातुकामान्नभयान्नलोभाद्धर्मंत्यजेज्जीवितस्यापिहेतोः॥धर्मोनित्यः
सुखदुःखेत्वनित्येजीवोनित्योहेतुरस्यत्वनित्यः॥६ इमांभारतसावित्रींप्रातरुत्थायपःपठेत्॥सभारत ग्म०
तफलंप्राप्यपरंब्रह्माधिगच्छति॥७॥आचारःपरमोधर्मोनृणांश्रेयस्करोभवेत्॥इहलोकेपरांकी १

र्तिःपरत्रपरमंसुखं॥८॥आचाराल्लभ्यतेश्रेष्ठमाचारात्कर्मलभ्यते॥कर्मणाजायतेज्ञानंज्ञानान्मोक्ष
मवाप्यते॥९॥आचारःपरमोधर्मआचारःपरमंतपः॥आचारःपरमंज्ञानमाचारात्किंनसाध्यते॥१०॥ए
वंनरोविनिश्चित्यकीर्तयेन्मधुसूदनं॥देहस्थितिंचकर्तव्यांविज्ञायशार्थयेद्धरिं॥११॥समुद्रवसनेदेविप
र्वतस्तनमंडले॥विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्वमे॥१२॥ईक्षेतततउत्थायबहिर्गांश्रोत्रियंशु
भं॥हित्वाचार्यंधनंपापिष्ठंनग्नमुत्कृत्तनासिकं॥१३॥ततोवाचंनियम्यैवनिष्ठीवोच्छ्वासवर्जितः॥अंत
र्धायतृणैर्भूमिंशिरःप्रावृत्यवाससा॥१४॥दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः॥कुर्यान्मूत्र
पुरीषेतुरात्रौचेद्दक्षिणामुखः॥१५॥प्रत्यादित्यंप्रत्यनलंप्रतिगांचप्रतिद्विजं॥मेहंतियेचयेषितुतेभ
वंतिगतायुषः॥१६॥गृहीतशिश्नश्चोत्थायमृद्भिरभ्युद्धृतैर्जलैः॥गंधलेपक्षयकरंशौचंकुर्यादतंद्रि

Indira Gandhi National Centre for the Arts

धु० तः॥१७॥ द्वे लिंगे मृत्तिके देये गुदे पंच करे दश। उभयोः सप्त दातव्या पादयोर्मृत्तिकात्रयं।१८॥ एतच्छौचं
२ गृहस्थानां द्विगुणं ब्रह्मचारिणां॥ त्रिगुणं स्याद्वनस्थानां यतीनां स्याच्चतुर्गुणं॥१९॥ लिंगशौचं
पुरा कृत्वा गुदशौचं ततः परं॥ शौचाहृते वामपादे पूर्वं न क्षालनं भवेत्॥२०॥ दिवा यद्विहितं शौचं तद
र्धं निशि कीर्तितं॥ [illegible]शौचं प्रकर्तव्यं चुलुकेन न धारया॥ तदर्धं मातुरे प्रोक्तमातुरस्यार्धमध्वनि॥
२१॥ स्त्रीशूद्रादेरशक्तानां गंधलेपक्षयो भवेत्॥ तथा शौचं प्रकर्तव्यं चुलुकेन न धारया॥२२॥ पर
स्य शोणितस्पर्शे रेतो विण्मूत्रजे तथा॥ चतुर्णामपि वर्णानां द्वात्रिंशन्मृत्तिकाः स्मृताः॥२३॥ कुर्या
द्द्वादशगंडूषान् पुरीषोत्सर्जने ततः॥ मूत्रोत्सर्गे तु चत्वारो भोजनांते तु षोडश॥२४॥ शौचे यत्नः सदा का राम०
र्यः शौचमूलो द्विजः स्मृतः॥ शौचाचारविहीनस्य समस्ता निःफलाः क्रियाः॥२५॥ त्यजेन्मृदं शौ २

च शेषां नियमातिक्रमे सति॥ गायत्र्यष्टशतं चैव प्राणायामत्रयं जपेत्॥२६॥ देशं कालं तथात्मानं द्रव
द्व्यं प्रयोजनं॥ उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्॥२७॥ इति शौचं॥ अंतर्जानुः शुचौ देशे
उपविष्ट उदङ्मुखः॥ प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्॥२८॥ आयतं पूर्वजः कृत्वा गो
कर्णाकृतिवत्करं॥ संहतांगुलिना तोयं गृहीत्वा पाणिना द्विजः॥२९॥ मुक्तांगुष्ठकनिष्ठेन शेषेणाच
मनं चरेत्॥ तावन्नोपस्पृशेद्विद्वान्यावद्वामेन न स्पृशेत्॥३०॥ त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः
समुपस्पृशेत्। अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः॥३१॥ हृत्कंठतालुगाभिस्तु यथासंख्यं द्वि
जातयः शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः॥३३॥ चंडालम्लेच्छसंभाषे स्त्रीशूद्रोच्छिष्ट
भाषणे॥ उच्छिष्टादेस्तथा योगे जलारोहावरोहयोः ३३॥ देवार्चादौ ते वक्रवस्त्रपरिधाने क्षपातने

Indira Gandhi National
Centre for the Arts

ध० निष्ठिवनेसदाचामेच्छ्रोत्रंवादक्षिणंस्पृशेत्॥३४॥स्नात्वापीत्वाक्षुतेसुप्तेभुक्तेरथ्योपसर्पणे॥आ
३ चांतःपुनराचामेत्परिधानेचसंध्ययोः॥३५॥द्राक्षादीनिफलानीक्षुन्पयोमूलंघृतंदधि॥तांबूलमौषधंप
त्रेहविर्भुक्त्वापिनाचमेत्॥३६॥एवमाचम्यदंतानांकाष्ठेनविमृजेन्मलं॥मंत्रितेनयथोक्तेनपुनःप्रक्षाल्य
तत्यजेत्॥३७॥अलाभेदंतकाष्ठानांनिषिद्धायांतिथौतथा॥कुर्याद्द्वादशगंडूषान्जिह्वोल्लेखंसदापुनः
३८॥अथाक्षतास्तिलंदर्भांश्चपादायचगोमयं॥नदींगत्वापुण्यजलांसंकल्पस्नानमाचरेत्॥३९॥ना
भिमात्रेजलेगत्वाचिःकुर्यान्मज्जनंततः॥गोमयेनतुसर्वांगंविधिनालेपयेत्पुनः॥४०॥आचम्य
मार्जनंकुर्यात्त्र्यानासाग्रपीऽर्जनं॥स्नानांगतर्पणंकृत्वायक्ष्मणोजलमाहरेत्॥४१॥ततआचम्यसंत्य एम०
ज्यकुशान्नवस्त्रंचधारयेत्सितंमांजिष्ठंपीतंचनीलंत्राम्लंरागतःक्रमात्॥४२॥अष्टहस्तंनवंश्वेतं ३

सदशंनान्यधारितं॥अहतंतद्विजानीयात्सर्वकर्मसुपावनं॥४३॥नैकवस्त्रःप्रवर्तेतद्विजोहोमार्चनेज
पे॥अभावेचोपवीतंवाधारयेत्तत्प्रदेशकं॥४४॥यज्ञोपवीतेद्वेधार्येश्रौतेस्मार्तेचकर्मणि॥तृतीयमुप
त्तरीयार्थेवस्त्राभावेचतदर्थकं॥४५॥नित्यंनैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते॥प्रातःसमाचरेत्स्नानंत
च्चनित्यंप्रकीर्तितं॥४६॥आरोग्यमायुःपुण्यंचतेजोवीर्यंयशोधनं॥प्रभातस्नायिनःपुंसोभवंति
शुचिनःसदा॥४७॥गृहेचोष्णोदकस्नानंतर्पणादिविवर्जितं॥बालवृद्धातुराणांचविधिनापाव
नंस्मृतं॥४८॥निष्पीड्यस्नानवस्त्रंतुधारयेद्भस्मवामृदं॥तोयंवाजलमध्यस्थःपश्चात्संध्यांसमाच
रेत्॥४९॥स्नात्वापुण्ड्रंमृदाकुर्याद्धुत्वाचैवतुभस्मना॥देवानभ्यर्च्यगंधेनसर्वपापापनुत्तये ५० धा
र्येभस्मत्रिसंध्यंतुगृहीणाजलसंयुतं॥सार्वकालंभवेत्स्त्रीणांयतीनांजलवर्जितं ५१ प्रणवेनवा

Indira Gandhi National
Centre for the Arts

१०
४
हृतीः सप्रणवां गायत्रीं शिरसा सह॥ त्रिः सास पठेदायतप्राणः प्राणायामः स उच्यते॥५२॥ प्राणानायम्य विधि
वद्वाग्यतः संयतेंद्रियः॥ अथ संध्यामुपासिष्य इति संकल्प्य मार्जयेत्॥५३॥ नवप्रणवयुक्तेन आपोहि
ष्ठादि चेन तु॥ अथाचमनमादाय सूर्यश्चेति पिबेत्ततः॥५४॥ तथा मध्यंदिने त्वापः पुनंत्विति च मं
त्रतः॥ अग्निश्चेत्यनुवाकेन सायंकालेपि वेदवित्॥५५॥ अथाचम्य करं गं तेच पुनः कुर्वीत मार्जनं॥
प्रणवेन व्याहृतिभिर्गायत्र्या प्रणवाद्यया॥५६॥ आपोहिष्ठेति सूक्तेन ततः कृत्वाघमर्षणं॥ ऋतं
चेति त्रचेनैव वामभागे जलं क्षिपेत्॥५७॥ अथाचम्य कराभ्यां वै तोयमादाय मंत्रितं सुसंहस्ते
नसाविध्याचिरूर्ध्वं च क्षिपेज्जले॥५८॥ ईषन्नम्रः प्रभाते तु मध्याह्ने ऋजुसंस्थितः॥ द्विजोर्ध्वे प्रक्षि एम०
पेदप्सु सायं तूपविशेद्भुवि॥५९॥ आकृष्णेनेति मध्याह्ने हंसवत्या शवासहृत्॥ उपस्थायततः ४

श्री
सूर्यं जपं कुर्याद्द्विजोत्तमः॥६०॥ अष्टोत्तरशतं नित्यं प्रातस्तिष्ठन् जपेद्बुधः॥ उपविश्य तु मध्याह्ने सायं
च विधिना सनेत्॥६१॥ सहस्रपरमां देवीं शतमध्यां दशावरां॥ गायत्रीं संस्मरेद्धीमान् हृदि वा सूर्यमंडले॥६२
मननं तोषणं शौचं मौनं मंत्रार्थचिंतनं॥ अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः॥६३॥ वस्त्रेणाच्छाद्य तु क
रं दक्षिणं यः सदा जपेत्॥ तस्य तत्स्यात्फलं प्रोक्तं विनास्यां तन्निःफलं॥६४॥ उत्तमं मानसं जप्यमुपां
शुं मध्यमं स्मृतं॥ अधमं वाचिकं प्रोक्तं सर्वमंत्रेषु पंडितैः॥६५॥ यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्ष
रैः॥ मंत्रमुच्चारयेद्वाचा वाचिकोयं जपः स्मृतः॥६६॥ शनैरुच्चारयेन्मंत्रमीषदोष्ठौ प्रचालयेत्॥ अपरैर्न
श्रुतः किंचित्स उपांशुर्जपः स्मृतः॥६७॥ धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदं॥ शब्दार्थचिंतन
राजनं कथ्यते मानसो जपः॥६८॥ पर्वभिस्तु जपेद्देवीं मालाकाम्यजपे स्मृतः॥ गायत्र्यावेदमूलत्वाद्वे

Indira Gandhi National Centre for the Arts

१० दः पर्वस्तु गीयते ॥६९॥ आरभ्यानामिकामध्यं पर्वाण्युक्तान्यनुक्रमात् ॥ तर्जनीमूलपर्यन्तं जपेद्दशसु पर्वसु
५ ॥७०॥ मध्यमांगुलिमूले तु यत्पर्वद्वितयं भवेत् ॥ तं वै मेरुं विजानीयाज्जपे तं नातिलंघयेत् ॥७१॥ जपेनैव तु
संसिध्येद्ब्राह्मणो नात्र संशयः ॥ कुर्यादन्यं न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥७२॥ चतुर्विंशत्यक्षरात्मा व्याहृ
तिप्रणवान्वितः ॥ सर्ववेदोद्धृतः सारो मंत्रोयं समुदाहृतः ॥७४॥ आर्षं छंदो दैवतं च विनियोगं तथैव च ॥
वेदितव्यं प्रयत्नेन ब्राह्मणेन विपश्चिता ॥७३॥ गायत्र्या मुनिराख्यातो विश्वामित्रो महाद्युतिः गायत्री
छंद इत्युक्तं दैवतं सविता स्मृता ॥७५॥ प्रणवस्य ऋषिर्ब्रह्मा गायत्रं छंद एव च देवोग्निः सर्वकामादौ
विनियोगो विशिष्यते ॥७६॥ व्याहृतीनां समस्तानां परमेष्ठी प्रजापतिः ॥ प्रजापतिस्तु बृहतीक्ष्याद्याः राम०
परिकीर्तिताः ॥७७॥ हृदयादिषडंगानां न्यासं कुर्यात्तदादिभिः ॥ अवैदिकत्वान्न चापि नेछंति सुधियः ५

परे ॥७८॥ यया प्रकाश्यते ब्रह्म सच्चिदानंदलक्षणं ॥ त्रिविधा सा तु विज्ञेया सन्ध्या ध्येया द्विजातिभिः ७९
गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने ॥ सरस्वती च सायाह्ने सैव संध्या त्रिषु स्मृता ॥८०॥ सम्यक् ध्येय
त्वात्संध्येति ध्यै धातो रूपमुच्यते ॥ प्रतिश्रयहान्नदोषाद्वा पातकादुपपातकात् ॥८१॥ गायंतं त्रायते यस्मा
द्गायत्री प्रोच्यते ततः ॥ सवितृद्योतनात्सैव सावित्री परिकीर्तिता ॥८२॥ जगतः प्रसवित्री वाग्रूप
त्वात्सरस्वती ॥ य एवं वेत्ति गायत्रीं स याति परमां गतिं ॥८३॥ गायत्री तु भवेद्रक्ता सावित्री शुक्ल
वर्णिका ॥ सरस्वती तथा कृष्णा उपास्या वर्णभेदतः ॥८४॥ गायत्री ब्रह्मरूपा तु सावित्री रुद्ररूपि
णी ॥ सरस्वती विष्णुरूपा उपास्या त्रिकालतः ॥८५॥ न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह
सोहमस्मीत्युपासीत विधिना येन केनचित् ॥८६॥ संध्येति सूर्यं ब्रह्म संध्यानादविभागतः ॥

Indira Gandhi National
Centre for the Arts

सं० ब्रह्माद्यैः सकलैर्भूतैस्तं वाते: स चिदात्मनः॥८७॥तस्य हंसोहमस्मीति सोहमस्मीति वा मतिः
६ भवेदुपासकस्येति ह्येवं वज्रविदो विदुः॥८८॥संध्याकालः प्रागुदयाद्विप्रस्य हि मुहूर्तकः॥क्ष
त्रियस्य तदर्धस्यात्तदर्धस्या हि शौ स्मृत॥८९॥ तथैवास्तमितेतेषां विप्रादीनामयं क्रमः॥
अथ धर्मयामाद्दासायं संध्यामाध्याहिकीष्यते॥९०॥उत्तमा तारकोपेतामधमा लुप्ततारका
अधमा सूर्यसहिता प्रातः संध्या त्रिधा मता॥९१॥उत्तमा सूर्यसहिता मध्यमा लुप्ततारका॥
कनिष्ठा तारकोपेता सायं संध्या त्रिधा मता॥९२॥अनृतं मद्यगंधं च दिवास्वापं च मैथुनं॥पु
नाति वृषलस्यान्नं वहिः संध्यां ह्युपासिता॥९३॥गृहे त्वेकगुणा संध्या गोष्ठे दशगुणा स्मृता राम०
शतसाहस्त्रिका नद्यामनंता विष्णुसंनिधौ॥९४॥उदयास्तमयादूर्ध्वं यावत्स्याद्धटिकात्र ६

य तावत्संध्यामुपासीत प्रायश्चित्तं ततः परं॥९५॥संध्याकालेत्वतिक्रांते स्नात्वाचम्य यथाविधि
जपेद्दृष्टशतं देवीं ततः संध्यां समाचरेत्॥९६॥सूतके कर्मणां त्यागः प्राणायामाद्यमंत्रकं कु
र्यात्तु दशवारं च जपेद्देवीं समाहित॥९७॥जलाभावे महामार्गे रोगार्ते वंधनेऽशुचौ मार्जनादी
नि लुप्येयुर्ध्यायेद्देवीं समाहितः॥९८॥उपस्थानं ततः कुर्यात् जातवेदस इत्यृचा॥मित्रस्य चर्ष
णी धृतश्चाभ्यां तच्छंयोरावृणीमहे॥९९॥नमो ब्रह्मण इत्येतैः प्रातः सायं च वारुणैः ततो नत्वा
दिशः सर्वाल्लोकपालांश्च शेषतः॥१००॥गुरून्वृद्धान्ब्राह्मणांश्च भक्त्या देवीं विसर्ज
येत् कर्मेश्वरार्पणं कृत्वा कृतकृत्यो भवेन्नरः॥१०१॥इत्थं यः कुरुते विप्रस्त्रिषु कालेषु भ
क्तितः॥उपासनं तु देव्याश्च पापशून्यः सदा भवेत्॥१०२॥संध्याहीमुपासते ये तु सततं संशि

Indira Gandhi National
Centre for the Arts

प्र० तव्रताः॥ विध्वस्तपापास्ते यांति ब्रह्मलोकं सनातनं॥१०३॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्व
७ कर्मसु॥ यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत्॥१०४॥ संध्या येन न विज्ञाता संध्या येनानु
पासिता॥ जीवमानो भवेच्छूद्रो मृतः श्वा चाभिजायते॥१०५॥ अग्निकार्यं ततः कुर्याद्ब्रह्मचारी स्वसं
ध्ययोः॥ दंडाजिनोपवीतानि मेखलां चैव धारयेत्॥१०६॥ गुरुस्त्वेवाप्युपासीत स्वाध्यायार्थं स्व
माहितः॥ आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत्॥१०७॥ स गुरुर्यः क्रियाः कृत्वा वेदम
स्मै प्रयच्छति॥ उपनीय ददद्वेदमाचार्यः स उदाहृतः॥१०८॥ एकदेशमुपाध्याय ऋत्विग्य
ज्ञकृदुच्यते॥ एते मान्या यथा पूर्वमेभ्यो माता गरीयसी॥१०९॥ ब्राह्मणेषु चरेद्भैक्ष्यमनिंद्येष्वा रा०
त्मवृत्तये॥ गुरुमेवानुवर्तेत मधुमांसादिकं त्यजेत्॥११०॥ एवं चरेद्ब्रह्मचर्यं द्वादशाब्दानि पंच वा ७

अविरक्तो यदि गुरुं तोषयित्वा गृही भवेत्॥१११॥ संध्यावसाने श्रौतं तु स्मार्तं वा होममाचरेत् तत्राप्यशक्तः
करणे सदाचारले भेद्ध्रुवं॥११२॥ अर्थी समर्थो विद्वांश्च श्रौतं कुर्वीत भक्तितः कौशकर्मैव वा लाना
मन्यथा निष्फलं भवेत्॥११३॥ ततः कुर्यात्सुजनं चरेद्वदेवस्य भक्तितः॥ उक्तेन विधिना काम्यं जपं कुर्यात्ततः
सुधीः॥११४ ततः किंचिद्यथाशक्ति दानं दद्याद्द्विजातये॥ तपस्विने श्रोत्रियाय तत्स्वनित्यं प्रकीर्तितं ११५
ततः कुर्यान्मंगलानां दर्शनं सर्वदा गृही॥ पित्रादीनां च वृद्धानां प्रणामं हितमाचरेत्॥११६॥ लोकेस्मि
न्मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः॥ हिरण्यं सर्पिरादित्य आपो राजाथवा सती॥११७॥ अभिचिक्त
पिन्नासन्नीराजाभिस्तु मेहोदधिः दृष्टमात्राः पुनंत्येते तस्मात्पश्येत्तु नित्यशः॥११८॥ दिवसस्याष्टमाग्य
नामाद्यएनत्समाचरेत्॥ द्वितीये च तथा भागे वेदाभ्यासो विधीयते॥११९॥ जपेद्ध्यापयेच्छिष्यान्धारये

Indira Gandhi National Centre for the Arts

प० द्वैविचारयेत्॥ अवेक्षेत च शास्त्राणि धर्मादीनि हितानि तम॥१२०॥ वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः॥ त
८ द्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधा॥१२१॥ यज्ञानां तपसां चैव शुभानां चैव कर्मणां॥ वेद एव द्विजाती
नां निःश्रेयसकरः परः॥१२२॥ तृतीये पोष्यवर्गार्थं धनमिच्छेत्तु बुद्धिमान्॥ न्यायोपार्जितवित्तेन पोष्या
णां पालनं वरं॥२३॥ माता पिता गुरुर्भार्या प्रजा हीनः समाश्रितः अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग
उदाहृतः॥१२४॥ षराणां तु कर्मणामस्य त्रीणि कर्माणि जीविका याजनाध्यापने चैव विशुद्धाच्च प्रति
ग्रहः॥१२५॥ इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च॥ प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा
१२६॥ सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः॥ प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च १२७ प्रधा राम०
नं क्षत्रिये कर्म प्रजानां परिपालनं॥ कुसीद कृषिवाणिज्यं पाशुपाल्यं विशः स्मृतं १२८ शस्त्रास्त्रधा ८

रणं प्रोक्तं क्षत्रस्याजीवनाय च॥ वाणिज्यादि विशः प्रोक्तं शूद्रस्य द्विजसेवनं॥१२९॥ प्रायः कलियुगे
वर्णा वाद्यंते भान्तउत्तमो॥ तथा रूढमन्यंते क्षत्राणां च विशां स्थितिं॥१३०॥ याजयंत्यपि शूद्रांस्तान्पाठ
यंति स्तुवंति च॥ नमंति द्रव्यलाभार्थे देवमायाविमोहिताः॥१३१॥ अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे
परे॥ अन्ये कलियुगे नृणां युगह्रासानुसारतः॥१३२॥ तपो धर्मः कृतयुगे ज्ञानं त्रेतायुगे स्थितं॥ द्वापरे
चाध्वरः प्रोक्तस्तिष्ये दानं दयादमः॥१३३॥ कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः॥ द्वापरे शंख
लिखिताः कलौ पाराशराः स्मृताः॥१३४॥ त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत्॥ द्वापरे कुलमे
कं तु कर्तारं च कलौ युगे॥१३५॥ कृते संभाषणादेव त्रेतायां स्पर्शनेन षा॥ द्वापरे त्वन्नमादाय कलौ
पतति कर्मणा १३६ कृते तात्कालिकः शापः त्रेतायां दशभिर्दिनैः द्वापरे चैकमासेन कलौ

Indira Gandhi National Centre for the Arts

प० संवत्सरेणा तु ॥१३७॥ कृते तात्कालिकं अभिगम्य कृते दानं त्रेतास्वाहूय दीयते। द्वापरे याचमानाय सेवया
९ दीयते कलौ ॥१३८॥ जितो धर्मो ह्यधर्मेण सत्यं चैवानृतेन च जिताश्चौरैश्च राजानः स्त्रीभिश्च पुरुषाः कलौ
१३९॥ सीदन्ति चाग्निहोत्राणि गुरुपूजा प्रणश्यति। कुमार्यश्च प्रसूयन्ते अस्मिन्कलियुगे सदा ॥१४०
यदा यदा सतां हानिर्वेदमार्गानुसारिणां। तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः ॥१४१॥ युगे युगे च ये
धर्मास्तेषु तेषु द्विजातयः। तेषां निंदा न कर्तव्या युगरूपा हि ते स्मृताः ॥१४२॥ द्विविधस्तु गृही ज्ञेयः सा
धकश्चाप्यसाधकः। अध्यापनं याजनं च पूर्वस्याहुः प्रतिग्रहं ॥१४३॥ असाधकस्तु यो विप्रो गृहस्थाश्र
मसंस्थितः। शिलोञ्छं तस्य कथितं वल्लीकणसंग्रहः ॥१४४॥ ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा स्म०
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाच ॥१४५॥ ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितं मृतं भैक्षं ९

याचितं तु प्रमृतं कर्षणं स्मृतं ॥१४६॥ सत्यानृतं तु वाणिज्यं तेनापदि च जीवनं सेवा श्ववृत्तिर्वि
ख्याता ब्राह्मणानां विगर्हिता ॥१४७॥ वृद्धौ च मातापितरौ साध्वी भार्या शिशुः सुतः। अप्यकार्यशतं कृत्वा
भर्तव्या मनुरब्रवीत् ॥१४८॥ असुस्मात्सृष्टात्नादच्छिद्राच्चैव वाससः। अपरोक्ष्यभावाद्वृद्धिमिच्छन्न पत
त्यधः ॥१४९॥ प्रतिग्रहसमर्थोपि नाददीत प्रतिग्रहं। ये लोका दानशीलानां स तानाप्नोति पुष्कलान्
१५०॥ गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः। अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् ॥१५१॥
अग्नीनात्मनि वैतानान्समारोप्य यथाविधि। अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः ॥१५२॥ अप्र
यत्नः सुखार्थेषु ब्रह्मचारी धराशयः एकपादेन तिष्ठेत मरीचीन्वापिबेत्सदा ॥१५३॥ पंचाग्निधूमपो
वा स्यादूर्ध्वपः सोमपोथ वा। शीर्णपर्णाशनो वा स्यात्तपोभिः कालमावहेत् १५४ इति तृतीयभा

प्र० गक्षत्यं॥चतुर्थेतु दिवाभागेस्नानार्थंमृदमाहरेत्॥तिलपुष्पकुशादीश्चस्त्वायाञ्चाह्नविमेजले॥१५५॥
१० प्रातर्मध्याह्नयोःस्नानंवानप्रस्थगृहस्थयोः॥यतेस्त्रिषवणंप्रोक्तंसकृत्तुब्रह्मचारिणः॥१५६॥अस
मर्थोऽछरीरस्यकालशक्त्याद्यपेक्षया॥मंत्रस्नानादिकंशाक्तःपरेक्तंशल्वबुद्धयः॥१५७॥मांत्रंभौमं
तथाग्नेयंवायव्यमेवच॥सारस्वतंवारुणंचगायत्रंकापिलंस्मृतिः॥१५८॥आपोहिष्ठादिभिर्मांत्रं
मृदालंभस्तुपार्थिवं॥आग्नेयंभस्मनास्नानंवायव्यंगारजःस्मृतः॥१५९॥यत्तुसातपवर्षेणस्नानंत
द्दिव्यमुच्यते॥विद्वन्सरस्वतीप्राप्तंस्नानंसारस्वतंविदुः॥१६०॥अवगाहोवारुणंचगायत्र्याजलसे
चनं॥गायत्र्यंदशाक्तस्त्वस्तुस्नानंपापप्रणाशनं॥१६१॥आर्द्रेणवाससासांगमार्जनंकापिलंस्मृतं एम०
॥चतुर्भुजस्यविष्णोश्चचिंतनंमानसंस्मृतं॥१६२॥एवमुक्तेषुयोगेषुसंध्याहीयोग्यताभवेत्॥ १०

श्राद्धहोमार्चनादौचनैवयोग्योविनाजलैः॥१६३॥ब्रह्मक्षत्रविशांचैवमंत्रवत्स्नानमिष्यते तूष्णीमेव
हिशूद्रस्यस्त्रीणांचकुरुनंदन॥१६४॥स्नानंमाध्याह्निकंकृत्वासंध्याकर्मनिवर्त्यच ब्रह्मयज्ञंविधाया
श्रमेत्याचरेत्परान्॥१६५॥यंयंक्रतुमधीतेचतस्यतस्याप्नुयात्फलं॥त्रिर्वित्तपूर्णांपृथिवीदानस्यफ
लमश्नुते॥१६६॥तर्पणंनैत्यकंकुर्याद्ब्रह्मयज्ञपुरःसरं॥ग्रहणादिनिमित्तेषुब्रह्मयज्ञंविनाभवेत्
१६७॥जलांतेतिलदर्भाश्चकुर्यात्तुष्टानापयाचते॥नानुष्ठानफलंतस्यहारवेखहितत्फलं॥१६८॥सर्व
श्वमनुकीर्त्यैवनामगोत्रमनंतरं॥वस्त्रादिकंनमोंतेनस्वधाकारेणतर्पयेत्॥१६९॥शर्मांतंब्राह्मण
स्योक्तंवर्मांतंक्षत्रियस्यतु॥गुप्तांतंचैववैश्यस्यदासांतंशूद्रजन्मनः॥१७०॥दांतनामभवेत्स्त्रीणा
मूढानांभर्तृगोत्रेण॥पितृगोत्रकुमारीणांवर्णानामपितत्था॥१७१॥इतिचतुर्थेभागकृत्य॥पंचमेतु

Indira Gandhi National Centre for the Arts

प्र० दिवाभागे वैश्वदेवादिकं चरेत्॥ नित्यश्राद्धं प्रकुर्वीत ततो भुंजीत वाग्यतः॥७२॥ वैश्वदेवं पुरा कृत्वा नित्ये
११ चाभ्युदये तथा॥ स्वामीष्टदेवतादिभ्यो नैवेद्यं विनिवेदयेत्॥१७३॥ प्रातः सायं वैश्वदेवावुपवासदिने पि च॥
विधिना तु प्रकर्तव्यावन्यथा किल्बिषी भवेत्॥१७४॥ अशक्तश्चेद्द्विरावृत्त्या कुर्याद्वा सहितौ दिवा॥ प्रबुध्येन
हविषा भक्त्या पंचसूनापनुत्तये॥७५॥ ब्राह्मणा विभक्ता नमिकदेशनिवासिनां॥ एक एव तु कुर्वीत च तु
र्येत्तान् सदा गृही॥७६॥ बलिकर्म स्वधाहोमः स्वाध्यायातिथिसत्क्रियाः॥ भूतपित्रमरब्रह्ममनुष्याख्या म
हामखाः॥१७७॥ हंतकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः। दद्यादतिथये नित्यं बुध्यात परमेश्वरं
१७८॥ ग्रासमात्रं भवेद्भिक्षा अग्रं ग्रास चतुष्टयं॥ अग्रं चतुर्गुणी कृत्य हंतकारोऽभिधीयते॥१७९॥ राम०
वैश्वदेवे तु संप्राप्ते भिक्षुके गृहमागते॥ उद्धृत्य वैश्वदेवार्थं भिक्षां दत्वा विसर्जयेत्॥१८०॥ वैश्वदेवाकृ ११

तं पापं शक्तो भिक्षुर्व्यपोहतुं॥ न हि भिक्षुकृतान् दोषान्वैश्वदेवो व्यपोहति॥८१॥ यतिश्च ब्रह्मचारी च वि
द्यार्थी गुरुपोषकः॥ अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः॥१८२॥ मूढो वा यदि चांडालः
शत्रुर्वा ब्रह्मघातकः॥ आगतो वैश्वदेवांते सोऽतिथिः स्वर्गदायकः॥१८३॥ दद्याच्च भिक्षात्रितयं प
रिव्राड् ब्रह्मचारिणां॥ इच्छया च ततो दद्याद्विभवे सत्यवारितः॥१८४॥ यत्फलं हि गवां कोटिदानाद्वै
र्धनवान्नृप॥ प्राप्नोति च महायज्ञैर्दरिद्रस्तदवाप्नुयात्॥१८५॥ षड्दैवतं तु यच्छ्राद्धं देवपिंडादिवर्जि
तं॥ कुर्यादहरहस्तच्च नित्यमेव प्रकीर्तितं॥१८६॥ भिक्षमन्नं स्वयं भुंक्ते जघन्यं प्राणस्य यः॥ दद्याति
निरयान्घोरान्स नरः प्रतिपद्यते॥१८७॥ अशक्तश्चेद्यथाशक्ति किंचिदन्नं द्विजाय वै॥ पितृभ्यश्च
स्वधेत्युक्त्वा दद्याद्वा भोजयेद्धुतं॥१८८॥ बालस्ववासिनी वृद्धगर्भिण्यातुरकन्यकाः॥ संभोज्याति

Indira Gandhi National
Centre for the Arts

प० थिहृद्धांश्चर्दपत्योःशेषभोजनं॥१८९॥उपलिर्वीहृद्गर्भिण्यातुरकन्यकाः॥स्त्रैं नेश्यचौदेशेचतुर
१२ स्रचिकोणार्क॥वर्तुलंचार्धचंद्रंचविशादिनांचमंडलं॥९०॥पंचाशत्पलिकंकांस्यंस्यात्पथेन्नंराजतं
॥सौवर्णंवाश्वपत्रैर्वानिर्मितंभाजनंशुभं॥१९१॥शाकादीन्पुरतःस्थाप्यभक्ष्यभोज्यंचवामतः॥
अन्नंमध्येप्रतिष्ठाप्यदक्षिणेघृतपायसौ॥१९२॥हस्तौपादौतथैवास्यंप्रक्षाल्याचम्यप्राणसच॥
ततोग्रासान्समुद्धृत्यगवांचविनिवेदयेत्॥१९३॥अन्नंसंप्रोक्ष्यगायत्र्यासत्यंत्वर्तेतिमंत्रतः॥ऋ
तंत्वेतिचसायंतुपरिषिंचेत्प्रदक्षिणं॥१९४॥यमायत्वादिमंत्रैश्चनमोनैर्ऋतिदक्षिणेबलिं॥दत्वाभि
मंत्र्यचान्नंवैकुर्यादाचमनंसकृत्॥१९५॥यथारसंनजानातिजिह्वाप्राणाहुतीस्तथा॥हुत्वा राम०
स्पेथजलंस्पृष्ट्वाहरिंस्मृत्वाथवाग्यतः॥१९६॥प्राग्द्रवंपुरुषोश्नीयान्मधुरंकठिनंततः॥मध्ये १२

मध्येतुपानीयंकिंचिदम्लंद्रवंपुनः॥१९७॥अष्टौग्रासामुनेर्भक्ष्याःषोडशारण्यवासिनः॥द्वा
त्रिंशत्तुगृहस्थस्यत्वमितंब्रह्मचारिणः॥१९८॥जठरंपूरयेदर्धमन्नैर्भागंजलेनतु वायोःसंच
रणार्थायचतुर्थमवशेषयेत्॥१९९॥भोजनंतुनिःशेषंकुर्यात्प्राज्ञःकथंचन॥अन्यत्रदधिस
र्प्काज्यपललक्षीरमध्वपः॥२००॥आयुष्मान्प्राङ्मुखोभुंक्तेयशस्वीदक्षिणामुखः॥धन
वान्पश्चिमास्यस्तुधर्मवानुत्तरामुखः॥२०१॥एकांतेहिमहस्तःसन्प्राङ्मुखोमौनमास्थितः॥
हितमेध्यमिताहारीबलारोग्येनमुंचति॥२०२॥एकपंक्त्युपविष्टानांविप्राणांसहभोजने॥यद्ये
कोपित्यजेत्पात्रंशेषमन्नंनभोजयेत्॥२०३॥अग्निनाभस्मनाचैवस्तंभेनसलिलेनच मार्गद्वार
रोश्चैवपंक्तिभेदोबुधैःस्मृतः॥२०४॥भोजनेदीपनाशःस्यात्स्पर्शोवाचाभिमंत्रितं हस्वादीपं

Indira Gandhi National
Centre for the Arts

प्र० तुभुंजीतनमाहुर्गात तोजपेत्॥२०५॥अर्कद्विपर्वेशचौचचतुर्दश्यष्टमीदिवा॥एकादश्यामहोरात्रंभु
१३ क्त्वाचांद्रायणंचरेत्॥२०६॥नोछिष्टोघृतमादद्यान्नपक्षन्नवर्णंतथा॥ग्रासशेषंचनाश्नीयात्पीत
शेषंनवापिबेत्॥२०७॥नफूत्कारंतथाकुर्यान्मौनीसन्नभार्ययासह॥नभोक्तव्यंतथाहस्तदत्तंचे
द्व्यंजनादिकं॥२०८॥भुक्त्वोछिष्टंसमाघ्रायसोदकंनिवेदयेद्भुवि॥उत्थायवहिरागत्यमुखहस्ता
द्विशोधयेत्॥२०९॥विष्णुस्नानतथैवान्नंपरिणामश्चवैतथा॥सत्येनत्वेत्वैभुक्तंजीर्यत्वन्नमि
दंतथा॥२१० इत्युच्चार्यस्वहस्तेनपरिमृज्यात्तथोदरं॥निघृष्यहस्तौतोयेनजलमश्नोनिषिंच्यतु
॥२११॥शर्यातिंचसुकन्यांचच्यवनंशक्रमश्विनौ॥भुक्तमात्रःस्मरेद्यस्तुचक्षुस्तस्यनहीयते॥ राम०
२१२॥उद्धृत्यपात्रंचोन्मृज्यभूमिमाचम्यसंस्मरेत्॥अगस्त्यादीन्हविपाकाययमक्षयेत्तुलसीदलं १३

१३॥सुपूगंचसुपत्रंचचूर्णैलादिसमन्वितं परणीयंदशिरामूलंचूर्णपत्रंविशेषतः॥२१४॥हित्वा
दत्वाद्विजेभ्यश्चताम्बूलंचर्वयेत्ततः॥वाक्पाणिपाददचापल्यंवर्जयेत्त्वासनेस्थितः॥२१५॥जीर्णान्नाभ्यं
जनैचैवकांस्यपात्रेचभोजनं॥यतिश्चब्रह्मचारीचविधवाचविवर्जयेत्॥११६॥इतिपंचमभागकृत्यं
॥इतिहासपुराणाद्यैःषष्ठसप्तमकौनयेत्॥अष्टमेलोकयात्रास्तुवहिःसंध्याततःपुनः २१७॥
अहिंसासत्यमस्तेयंशौचमिंद्रियनिग्रहः॥दानंदमोदयाक्षांतिःसर्वेषांधर्मसाधनं॥२१८॥वयो
बुध्यर्थवाग्वेषश्रुताभिजनकर्मणां॥आचरेत्सदृशीवृत्तिमजिह्मामशठांतथा॥२१९॥सायंसं
ध्यांतथाहोमंकृत्वासम्यक्यथाविधि॥वैश्वदेवंततःकुर्यादतिथिंचविशेषतः॥२२०॥स्वश
क्त्यापूजयेद्भक्त्यानतोभुंजीतकामतः॥उदङ्मुखंप्राङ्मुखंवादीयंराज्ञौसुरक्षयेत्॥२२१॥प्रदो

Indira Gandhi National Centre for the Arts

२० षयश्चिमौयामौवेदाभ्यासेनवैनयेत्॥प्रहरद्वयशायीतुब्रह्मभूयायकल्पते॥२२२॥शुचौदेशेमनोविते
१४ चशिल्पशास्त्रोक्तमंचकं॥शय्यांवास्थापयेद्धीमान्क्षुद्रजंतुविवर्जितां॥२२३॥उपानहौवेणुदंड
मंबुपात्रंतथैवच॥तांबूलादीनिरम्याणिसमीपेस्थापयेद्गृही॥२२४॥रात्रिसूक्तंजपेत्स्मृत्वासर्वो
श्चस्वस्वशायिनः॥नमस्कृत्वाव्ययंविष्णुंसमाधिस्थःस्वपेन्नरः॥२२५॥प्राच्यांवादक्षिणायां
वाशिरःकृत्वास्वपेद्गृही॥नार्द्रवासानग्नश्चशून्येभ्यक्ताश्चखेऽशुचिः॥२२६॥पत्नीमृतुमतीं
स्निग्धांतन्नंभोगविवर्जितां॥उपेयान्मध्यरात्र्यंतेनीरोगोनैन्नमानसः॥२२७॥षोडशर्तुनिशा
स्त्रीणांतस्मिन्युग्मासुसंविशेत्॥यथाकामीभवेद्वापिस्त्रीणांवरमनुस्मरन्॥२२८॥भर्तुःपादौ राम०
नमस्कृत्यशय्यांनग्नाननागता॥संस्मृत्यपरमात्मानंतस्याजंघेप्रसारयेत्॥२२९॥योनिंस्पृ १४

ष्ट्वाजपेत्सूक्तंविष्णुर्योनिंप्रजापतेः॥रेतःसिंचेत्ततोयोन्यांततोगर्भंबिभर्तिसा॥२३०॥ऋतौतुमैथु
नेस्नायाद्गर्भसंभूतिशंकया॥अन्यतोत्तदभावाच्चशौचंनिर्मूत्रवच्चरेत्॥२३१॥बहल्पंवास्वगृह्योक्तंयस्य
कर्मप्रकीर्तितं॥तस्यतावतिशास्त्रार्थेकृतेसर्वकृतोभवेत्॥२३२॥श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्व
नुष्ठितात्॥स्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः॥२३३॥इत्येतदखिलंप्रोक्तंमहन्यहनिवैमया॥ब्राह्म
णानांकृत्यजातमपवर्गफलप्रदं॥२३४॥नास्तिक्यादथवालस्याद्ब्राह्मणोनकरोतियः॥सयातिनर
कान्घोरान्कालयोनौप्रजायते॥२३५॥नान्योविमुक्तयेपंथामुक्त्वाश्रमविधिस्वकं॥तस्मात्कर्माणि
कुर्वीततुष्टयेपरमेष्ठिनः॥२३६॥कर्मभिर्जायतेशुद्धिस्ततोवैराग्यमाप्नुयात्॥विरक्तश्चभवेत्यागीक
ततःशांतिमवाप्नुयात्॥२३७॥यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः॥आत्मन्येवचसंतुष्टस्तस्यका
र्यंनविद्यते॥२३८॥नाध्येतव्यंनकर्तव्यंनभेतव्यंकदाचन॥योवैसर्वसमःशांतोयतिर्भवतिनान्यथा

Indira Gandhi National
Centre for the Arts

३० २३९॥ यावज्ज्ञानं ब्रह्मनिष्ठं गुरुं भक्त्या भजेत्ततः॥ निर्ममो निरहंकार एकाकी वनमाविशेत्॥२४०
१५ अष्टौ मासान्विहारः स्याद्यतीनां संयतात्मनां॥ एकत्र चतुरो मासान्वार्षिकान्निवसेत्पुनः॥२४१॥ अवि
मुक्ते प्रविष्टानां विहारस्तु न विद्यते॥ न देहो भविता तत्र दृष्टं शास्त्रं पुरातनं॥२४२॥ त्रिदंडं कुटिकां कंथां भि
क्षवाहंनेमासनं॥ कौपीनाच्छादनं वासः षडेतानि परिग्रहेत्॥२४३॥ रसायनक्रियां वादं ज्योतिषं शिल्पक
र्म च॥ परिग्रहं च वस्तूनां वर्जयेन्मलमूत्रवत्॥२४४॥ आसुप्तेरामृतेः कालं नयेद्वेदांतचिंतया॥ मनोवा
क्कायदंडं च धारयेत्सर्वदा यतिः॥२४५॥ कृत्वा मोक्षाश्रमं मोहान्नतः प्रच्यवते यदि॥ न तस्य निष्कृतिर्दृ
ष्टा पतितस्य दुरात्मनः॥२४६॥ अतः कर्मैव कर्तव्यं सर्वदा सुधिया कलौ॥ गंगास्नानं हरेः पूजा दया दानं एम०
दमः स्मृति॥२४७॥ अतः कर्मैश्वमेधादिकरणं॥ सुरायाश्च परिग्रहः॥ कमंडलुधृतिर्द्दंडव्रतं नैष्टि १५

कर्मैव च॥२४८॥ देवार्थं पशोर्हिंसा भ्रातृस्त्रीसुतजन्म च॥ गुणापेक्षाघसंकोचो मृतपंता चाघनिष्कृतिः
॥२४९॥ युद्धे प्रहतशास्त्रस्य विप्रस्य हननं तथा॥ शामित्रकं ब्राह्मणानां वनमोक्षाश्रमो तथा॥२५०॥
सवर्णाजापरिणयो महाप्रस्थानमेव च॥ इष्टित्वृणां मातुलादेरुद्वाहं सोमविक्रयः॥२५१॥ अग्निहोत्रं गवा
लंभो मधुपर्के सुराग्रहः॥ सामुद्रिकं चोपमुक्तिः सर्वं वर्ज्यं कलौ युगे॥२५२॥ वक्तृत्वादिहृशास्त्राणां ध
र्ममूलं श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते॥२५३॥ श्रौतं तत्र प्रमाणं स्याद्द्वयोर्द्वैधे श्रुतिर्वरा॥ श्रु
तिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ॥२५४॥ स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक्पृथक्॥ एवं
शास्त्रप्रमाणं च कार्याकार्ये व्यवस्थितौ॥२५५॥ तस्मादुक्तलस्तर्कोपि प्रत्यक्षं तर्कनिश्चितं॥ उपमा
नादिमानं च केचिदाहुर्मनीषिणः॥२५६॥ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः॥ वेदो नारायणः सा

Indira Gandhi National
Centre for the Arts

१० श्रात्वयंभूरितिशुश्रुमः॥२५७॥ गंगास्नानंशिवोदेवोविप्रपूजात्मचिंतनं॥ ध्यानंनारायणस्यैतत्सकलंधर्म
१६ लक्षणं॥२५८॥ कर्मणामनसावाचायत्नाद्धर्मंसमाचरेत्॥ अस्वर्ग्यंलोकविद्विष्टंधर्म्ममप्याचरेन्नतु॥२५९
योविप्रः कृतनित्यस्कृत्यः सर्वान्नकृतवान्मखान्॥ सस्नातः सर्वतीर्थेषुतप्तंतेनाखिलंतपः॥२६०॥ अ
धीत्यविधिवद्वेदान्सुतानुत्पाद्यधर्मतः॥इष्ट्वाचशक्तितोयज्ञैर्मनोमोक्षेनिवेशयेत्॥२६१॥ त्रैवार्षि
काधिकान्नोयः सहिसोमंपिबेन्नरः प्राक्सौमिकीः क्रियाकुर्याद्यस्यान्नंवार्षिकंभवेत्॥२६२॥ चंडा
लोज्ञायतेयज्ञकरणाच्छूद्रभिक्षितात्॥यज्ञार्थमर्थंभिक्षित्वायोनसर्वंप्रयच्छति॥२६३॥ तीर्थेयोप्रतिगृ
ह्णातिधर्मंविक्रयतत्परः॥तेयांतिनरकान्घोरान्काकयोनिंचिरंततः॥२६४॥ नवेददलमाश्रित्यप्रति राम°
ग्रहपरोभवेत्॥अस्नानाद्यावमाहाद्यादद्यातेकर्मनेनरत्॥२६५॥ दानंपरंगृहस्थस्यशुश्रूषाब्रह्मचारिणः १६

वनस्थस्यतपः प्रोक्तंयतेस्तुशमएवच॥२६६॥ त्राणंक्षमाब्राह्मणस्यक्षत्रियस्यपराक्रमः वैश्यस्यकृषि
वाणिज्यंशूद्रस्यद्विजसेवनं॥२६७॥यतः सर्वाणिभूतानियेनसर्वमिदंततं॥स्वकर्मणातमभ्यर्च्यसिद्धिंविंद
तिमानवः॥२६८॥नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते॥स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमान
वः॥२६८॥स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात्॥२६९॥स्वजात्यनुसारेणयोधर्मोयस्यकल्पितः॥
तत्तद्धर्मयुतैरेवप्राप्यतेपरमंपदं॥२७०॥इतिनिश्चित्यसततंतुष्टयेपरमात्मनः॥योगिनः कर्मकुर्वंति
संगंत्यक्त्वाविमुक्तये॥२७१॥यइमंस्मृतिसारार्थंमहर्षीणांचसंमतं॥भक्त्यापठेत्पाठयेद्वासविद्वान्मुक्ति
माप्नुयात्॥२७२॥शास्त्राब्धिमथनाज्जातोग्रंथोयंपारिजातकः॥बुधानांकामदोभूयान्मूढानांभजता
मपि॥२७३॥बहवोयद्यपिग्रंथोः पादपाः संतिभूतले॥तथाप्ययंविजरिनामफलैः शुभैः॥२७४॥इति
श्रीमन्महाङ्करोपनामकसदाशिवसूरिसूनुभगवद्भक्तकिंकरगंगाधरविरचितेप्रपंचसारवि–विवेकेत्र

Indira Gandhi National
Centre for the Arts

३० होरात्रक्षत्पनिरूपणंनामअष्टमोल्लासः समाप्तः संवत्॥१८ १७॥अषाढमासेशुक्लपक्षे ॥७॥ ७९
१७ राम०
१७